# सुन्दरकाण्ड षट्षष्टितमः सर्गः (६६) - ॥ सीता भणित प्रश्नाः ॥

एवमुक्तो हनुमता रामो दशरथात्मजः ।
तं मणिं हृदये कृत्वा प्ररुरोद सलक्ष्मणः ॥ १ ॥

तं तु दृष्ट्वा मणिश्रेष्ठं राघवः शोक कर्शितः ।
नेत्राभ्या मश्रु पूर्णाभ्यां सुग्रीव मिद मब्रवीत् ॥ २ ॥

यथैव धेनुः स्रवति स्नेहाद् वत्सस्य वत्सला ।
तथा ममापि हृदयं मणिरत्नस्य दर्शनात् ॥ ३ ॥

मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे ।
वधूकाले यथा बद्ध मधिकं मूर्ध्नि शोभते ॥ ४ ॥

अयं हि जल सम्भूतो मणिः सज्जन पूजितः ।
यज्ञे परम तुष्टेन दत्तः शक्रेण धीमता ॥ ५ ॥

इमं दृष्ट्वा मणिश्रेष्ठं यथा तातस्य दर्शनम् ।
अद्यास् म्यवगतः सौम्य वैदेहस्य तथा विभोः ॥ ६ ॥

अयं हि शोभते तस्याः प्रियाया मूर्ध्नि मे मणिः ।
अस्याद्य दर्शनेनाहं प्राप्तां तामिव चिन्तये ॥ ७ ॥

किमाह सीता वैदेही ब्रूहि सौम्य पुनः पुनः ।
पिपासुमिव तोयेन सिञ्चन्ती वाक्य वारिणा ॥ ८ ॥

इतस्तु किं दुःखतरं यदिमं वारि सम्भवम् ।
मणिं पश्यामि सौमित्रे वैदेही मागतं विना ॥ ९ ॥

चिरं जीवति वैदेही यदि मासं धरिष्यति ।
न जीवेयं क्षणमपि विना ता मसितेक्षणाम् ॥ १० ॥

नय मामपि तं देशं यत्र दृष्टा मम प्रिया ।
न तिष्ठेयं क्षणमपि प्रवृत्ति मुपलभ्य च ॥ ११ ॥

कथं सा मम सुश्रोणि भीरुभीरुः सती सदा ।
भयावहानां घोराणां मध्ये तिष्ठति रक्षसाम् ॥ १२ ॥

शारदस् तिमिरोन् मुक्तो नूनं चन्द्र इवाम्बुदैः ।
आवृतं वदनं तस्या न विराजति राक्षसैः ॥ १३ ॥

किमाह सीता हनुमंस् तत्त्वतः कथयाद्य मे ।
एतेन खलु जीविष्ये भेषजे नातुरो यथा ॥ १४ ॥

मधुरा मधुरालापा किमाह मम भामिनी ।
मद्विहीना वरारोहा हनुमन् कथयस्व मे ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥